# Pradoshapuja Mahimavarnanam

# પ્રદોષપૂજામહિમવર્ણનમ્

## Document Information

Text title : Pradoshapuja Mahimavarnanam

File name : pradoShapUjAmahimavarNanam.itx

Category : shiva, pUjA, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 48| 69-84 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# પ્રદોષપૂજામહિમવર્ણનમ્

-

બ્રહ્મા શિવાર્ચનવિધિં વિધિભિર્વિદિત્વા ભક્ત્યા પ્રદોષસમયે શિવપૂજનેન ।
પૂજ્યો ભવત્યનુદિનં પ્રણવાન્વિતાનિ પઞ્ચાક્ષરાણિ શિવનામમનોહરાણિ ॥ (પૂતો જપત્યનુદિનં)

વાણી ચ વાગ્ભિરમિતાભિરભઙ્ગુરાર્થૈઃ પ્રસ્તૌતિ શઙ્કરપદામ્બુજપૂજનં ચ ।
કૃત્વા પ્રદોષસમયેષ્વમરાઙ્ગનાભિઃ સાકં પ્રનૃત્યતિ વિભૂતિપવિત્રગાત્રા ॥

-

દેવાસ્તાવદુમાસહાયચરણામ્ભોજં પ્રદોષે મુહુ-
બિલ્વાદ્યૈઃ કુસુમૈશ્ચ ચન્દનવરૈઃ સમ્પૂજ્ય જાતોત્સવાઃ ।
તત્પૂજાવિરતાઃ કદાઽપિ ન ભવન્ત્યેવામૃતાસ્વાદને
કો વા સ્યાદ્વિરતઃ પ્રમોદવિરતઃ કો વા જગન્મણ્ડલે ॥ ૧॥

કઃ પ્રાણી ગણનાથનાથચરણામ્ભોજાર્ચનાનાદરઃ
સાયઙ્કાલમવાપ્ય દુર્લભતરં બ્રાહ્મણ્યમાસાદ્ય ચ ।
ત્યક્ત્વા કેવલમન્ત્યજાનપિ મહાપાપાશ્રયાન દુર્મુખાન્
દુર્વીર્યાન્ દુરદૃષ્ટકોટિઘટિતાન જારોપજારોદ્ભવાન્ ॥ ૨॥

મન્યેઽમું પુરુષાધમં નરખરં દુર્વીર્યપાતોદ્ભવં
પાપિષ્ઠાતિવરિષ્ઠમયપકુલસ્ત્રીયોનિગન્ધોન્મુખમ્ ।
યઃ સાયં શિવલિઙ્ગસઙ્ગરહિતઃ કાર્યાન્તરવ્યાપૃતઃ
શઙ્ગારાધનસાધનાદિવિમુખો ભૂભારરૂપઃ પરમ્ ॥ ૩॥

તદ્વંશઃ પ્રલયં પ્રયાતિ સહસા તન્નાશકૈસ્તૈર્વિના
બ્રહ્માણ્ડપ્રલયૈઃ પ્રદોષસમયે યઃ શઙ્કરાનર્ચકઃ ।
તચ્ચિત્તં ખલુ પિત્તપીતમનિશં તાતોઽપિ તસ્યાધમઃ
તન્માતા વ્યભિચારિણી શુનકજા જાતાઽપિ સા રાસભૈઃ ॥ ૪॥

બ્રહ્માણ્ડાનિ પુનાતિ શઙ્કરપરઃ સાયં શિવારાધકઃ

તત્તાતઃ સુકૃતી સતી ચ જનની તત્સોદરો બ્રાહ્મણઃ ।
તત્સન્તાનસમૃદ્ધિરપ્યનુદિનં તસ્યાભિવૃદ્ધિઃ સદા
સન્તોષૈર્ધનધાન્યદારવિભવાદ્યભ્યુચ્ચયઃ સન્તતમ્ ॥ ૫॥

તત્પાદાબ્જરજઃ પરં શિરસિ મે તસ્મૈ નમઃ સર્વદા
યઃ સાયં શિવલિઙ્ગપૂજનતઃ શ્રાન્તઃ પ્રણામૈર્મુહુઃ ।
નૃત્યોત્સાહકરઃ કરાદ્યભિનયઃ અત્યાદરાદાદર-
વ્યાહરૈર્હર શઙ્કર સ્મરહર ત્રાહીત્યમન્દોત્સવઃ ॥ ૬॥

સઙ્ગસ્તેન મમાસ્તુ સન્તતમુમાકાન્તં પ્રદોષેષુ યઃ
ક્ષીરાદ્યૈરભિષિચ્ય લિઙ્ગવિલયં શ્રીચન્દનાલેપનૈઃ ।
બિલ્વૈરપ્યમલૈરમન્દવિલસદ્ગન્ધૈર્મરન્દાન્વિતૈઃ
કુન્દૈરર્ચયતિ પ્રકૃષ્ટવિભવૈઃ કર્પૂરદીપાદિભિઃ ॥ ૭॥

સત્સઙ્ગૈર્દિનયાપનં ભવતુ મે યઃ સાયમીશાર્ચનં
ધ્યાત્વાઽઽનન્દઘનો વિભૂતિકવચો રુદ્રાક્ષભૂષોત્સવઃ ।
જિહ્વા શઙ્કરનામરૂપસુસુધાપૂરાદરાસ્વાદન-
વ્યાસક્તા શિવલિઙ્ગપૂજનમહોત્સાહસ્ય સાયં મુહુઃ ॥ ૮॥

વાસઃ સ્યાન્મમ તસ્ય મન્દિરવરે યઃ સાયમીશાર્ચના-
નન્દાપારતરઙ્ગસઙ્ગતતનુર્ભૂતિપ્રભાભૂષિતઃ ।
રુદ્રાક્ષાભરણઃ પ્રતિક્ષણમપિ શ્રીમન્વિરૂપાક્ષ માં
રક્ષ્યં પ્રેક્ષ્ય પરીક્ષ્ય મામકધિયા રક્ષેતિ યઃ સંવસેત્ ॥ ૯॥

પાતાલેઽપ્યુરગેશ્વરપ્રભૃતયઃ શ્રીહાટકેશાર્ચનં
સાયં સન્તતમેવ શાન્તહૃદયાઃ સાયં વધૂસંયુતાઃ ।
ધૂપૈર્દીપગણૈશ્ચ ચન્દનવરૈઃ પુષ્પૈરમન્દૈરપિ
પ્રાજ્યાજ્યાન્નવરૈરપારમધુરૈર્નાટ્યાદિભિશ્ચાન્વહમ્ ॥ ૧૦॥

સાયઙ્કાલશિવાર્ચનસ્ય મહિમા કેનાપિ ન જ્ઞાયતે
તસ્માદેવ વિમોહમેત્ય બહવઃ ત્યક્ત્વા શિવારાધનમ્ ।
કુમ્ભીપાકમુપેત્ય ગર્ભજનિતક્લેશં ચ સમ્પ્રાપ્ય તે
સંસારાર્ણવમજ્જનૈરનુદિનં તિષ્ઠન્તિ બમ્બારવૈઃ ॥ ૧૧॥

લોકે શાઙ્કરસઙ્ગતિઃ ખલુ સદા સાયં શિવારાધન-
ધ્યાનાય પ્રભવત્યવશ્યમસકૃત્ તત્સઙ્ગતેસ્તત્ ફલમ્ ।
સા યસ્યાસ્તિ સ એવ ભાગ્યનિવહાધારઃ સુરારાધિતઃ

તત્પાદામ્બુજપૂજનેન ભગવાન્ ભાલેક્ષણસ્તુષ્યતિ ॥ ૧૨॥

આકલ્પં યદિ ધર્મકોટિભિરહોરાત્રં ચ યો નીયતાં
કિં તૈઃ સાયમુમાસહાયચરણામ્ભોજાર્ચનં ચેદ્ભવેત્ ।
પાતિવ્રત્યસમં ખલુ વ્રતમિદં ત્યાગેઽસ્ય કિં દુર્ભગો
ન સ્યાદેવ તતઃ કદાપિ ન પરિત્યાજ્યં શિવારાધનમ્ ॥ ૧૩॥

સાયઙ્કાલશિવાર્ચનેન ભગવાન્ તુષ્ટો યથા શઙ્કરઃ
તદ્વન્નાન્યવિશેષકારનિયમાચારૈઃ સ તુષ્યત્યપિ ।
તસ્માત્સાયમુમાસહાયભજનં કૃત્વા વિમુક્તો ભવેત્
પાપાપારમહામ્બુરાશિભિરપિ પ્રાપ્નોતિ ભાગ્યાન્યપિ ॥ ૧૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે પ્રદોષપૂજામહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૪૮। ૬૯-૮૪ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 48. 69-84 ..

Proofread by Ruma Dewan

*Pradoshapuja Mahimavarnanam*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*